'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-II Examination, 2022

## SANSKRIT

## PAPER-III

Time Allotted: 4 Hours — Full Marks: 100

*The figures in the margin indicate full marks.*

### विभाग-क

1. प्रश्नद्वयं समाधेयम् – 12×2 = 24

(क) कति वेदाङ्गानि ? तेषां स्वरुपं प्रयोजनं च विशदीक्रियताम्।

(ख) अथर्ववेदस्य प्रतिपाद्यविषयाः प्रतिपादनीयाः।

(ग) ऋग्वेदस्य संवादसूक्तानां सोदाहरणं व्याख्या कार्या।

(घ) आरण्यकशास्त्राणां वैशिष्ट्यं प्रतिपादनीयम्।

2. कस्यचिदेकस्य टिप्पणी कार्या – 6×1 = 6

निरुक्तम्, आचार्यः सायणः, शौनकः सामवेदः,

अथवा

संक्षिप्तोत्तर लेखनीयम् (त्रयाणाम्) – 2×3 = 6

(क) वेदस्य चत्वारः भागाः के ?

(ख) ऋग्वेदस्य उपनिषदां नामानि लिखत।

(ग) वेदपाठस्य कति भेदाः ? तेषां नामानि लिखत।

(घ) सामवेदस्य मुख्यभागद्वयं किम् ?

(ङ) निरुक्तस्य के त्रयो विभागाः ?

### विभाग-ख

3. प्रश्नद्वयं समाधेयम् (कस्यचिद् एकस्य उत्तरं संस्कृतभाषया लेखनीयम्)। 12×2 = 24

(क) भारतीयसंस्कृतेः साहित्यस्य चोपरि महाभारतस्य प्रभाव आलोचनीयः।

(ख) कालिदासपरवर्तिसमये विरचितानां नाटकानां विवरणं सोदाहरणं प्रदेयम्।

(ग) संस्कृतनाटकोत्पत्तिविषये प्रचलितान् विभिन्नान् मतवादान् सम्यग् आलोचयत।

(घ) संस्कृतगद्यसाहित्ये गद्यकाररुपेण दण्डिनः अवस्थानं सम्यग् आलोचयत।

4. टिप्पणी कार्या (एकस्य)– 5

पञ्चतन्त्रम्, मुद्राराक्षसम्, बुद्धचरितम्, रघुवंशम्

5. अतिसंक्षिप्तोत्तरं लेखनीयम् (त्रयाणाम्) – 2×3 = 6

(क) प्राकृतभाषया विरचितस्य एकस्य नाटकस्य नाम लिखत। तत्र कति अङ्काः सन्ति ?

(ख) भर्त्तृहरेः शतकत्रयाणां नामानि लिखत।

(ग) रामायणस्य काण्डानां नामानि यथाक्रमं लिखत।

(घ) भासस्य रामायणाश्रितानां नाटकानां नामानि लिखत।

विभाग-ग

6. अधस्तनेषु एकः प्रश्नः समाधेयः – 10×1 = 10

(क) प्राचीन भारतस्य वास्तुशास्त्रम् अधिकृत्य नातिदीर्घः प्रबन्धो लेखनीयः।

(ख) व्याकरणशास्त्रम् आश्रित्य एकः प्रबन्धः लिख्यताम्।

7. अधस्तनेषु कस्यचित् एकस्य टिप्पणी कार्या 5×1 = 5

सुश्रुतसंहिता, अमरकोषः, आर्यभट्टः

विभाग-घ

8. एकः प्रश्नः समाधेयः – 12×1 = 12

(क) संस्कृतसाहित्यें प्रति बङ्गीयानामवदानं सम्यक् आलोचयत।

(ख) अर्वाचीनकाले विरचितानां संस्कृतकाव्यानां परिचयः प्रदेयः।

9. अधस्तनेषु द्वयोः टिप्पणी कार्या – 4×2 = 8

(क) केशवदासः

(ख) भाति मे भारतम्

(ग) पुष्पाञ्जलिः

(घ) बांलादेशोदयम्

——×——